VENKATASURI'S

# NAUKA CHARITRAM

IN SANSKRIT



**SAURASHTRA SABHA**

MUSEUM & SAHITYA

MADURA

1947



*Vide Pages 12 & 13*

॥ श्री ॥

श्रीमत्कविवेङ्कटसूरिविरचितम्

# नौकाचरित्रम्

## नाम काव्यम्

---

अडैयार् सङ्गीतशिरोमणिकलाशालाशास्त्रोपन्य

**राजगोपालार्येण**

सशोध्य सपादितम्

मद्रसर्वकलाशालासङ्गीतविभागाध्यक्षाणां

**साम्बमूर्त्यार्याचार्यवर्याणां**

उपोद्घातेन समुद्भासितम्




मधुरानगरीस्थ "सौराष्ट्रसभया"

सर्वजिन्नामसवत्सरे मेषे मासि

प्रकाशितम् ॥






ஸ்ரீமத கவி வேஙகடஸூரி ஸவாமிகள

Srimad Venkatasuri Svami

ஸ்ரீமத் கவி வேங்கடஸூரி அவர்களால் இயற்றப்பட்ட

# "நௌகா சரித்திரம்"

என்னும் காவ்யம்



அடையாறு ஸங்கீத சிரோமணி கலாசாலை

சாஸ்த்ரோபந்யாஸகரான

## ஸ்ரீமான் P K இராஜகோபால ஐயர்

அவர்களால் நன்கு பரிசோதிக்கப்பெற்றது




சென்னைப் பல்கலைக்கழகத்தின் ஸங்கீதப்பகுதியின்

தலைவரான பேராசிரியர்

## பரம்மஸ்ரீ P ஸாம்பமூர்த்தி ஐயர்

அவர்களுடைய முன்னுரையுடன்



மதுரை ஸௌராஷ்டிர ஸபையாரால்

வெளியிடப்பட்டது



ஸௌராஷ்ட்ர விஜயாப்தம் 635.

1947

 [ விலை அ 1

# TELUGU OPERA
# "NAU A C A IT A "

**Text in Telugu, songs in notation, in Tamil, and Tamil translation**

**Edited & Published**

BY

PROF P SAMBAMOORTHY, B A, B L,
*Head of the Dept of Indian Music*
*University of Madras*

---

## The Saurashtra Sabha.

Hereby acknowledges its indebtedness to SRIMA[N] P N K SUBBARAMA IYER, who has been gracious enoug[h] to bear the expenses of bringing out this publication

# FOREWORD

The Saurashtra Sabha, Madura, deserves to b congratulated on having launched upon a programm of publications of select manuscripts on music in thei library Ever since I perused their valuable collectior I have been impressing upon them the necessity o publishing them The Walajapet collection include manuscripts on avariety of topics Those pertaining t music are especially valuable and interesting The include not only unpublished musical compositions i notation but also unpublished works on Musicology.

It is a happy augury that the first work to b published is the "**Nauka Charitram**" in Sanskri verse by Kavi Venkata Suri The original 'Nauk Charitram" is a beautiful opera in Telugu and is on of the grand creations of Tyagaraja Deriving inspira tion from this work, Kavi Venkata Suri has given u an admirable poem His charming and racy style, hi poetic gifts and imagery and his capacity for vivid an colourful portrayal of incidents are all patent in thi work. Venkata Suri was a desciple of Walajape Venkataramana Bhagavatar and his name is alread familior to research scholars as the person wh preserved for us the horoscope of the great compose

The present work will be of interest to musicians and Sanskrit scholars alike

I hope the Saurashtra Sabha will follow up this publication, with publications of further manuscripts on music with them

6th May 1947

P SAMBAMOORTHY,
Head of the Department of
Indian Music
*University of Madras.*

Printed at the SREEVATHSA PRESS, Royapettah, Madras 14
Published by The Saurashtra Sabha, Madura,

## ॥ प्रस्तावना ॥

त्रिपुरहरनुतं तं भिन्नदन्तं धरन्तं
वरवितरणदक्षं दक्षपुत्रीसुपुत्रम् ।
दहरगगनभाजं विघ्नराजं स्वराजं
भवजलनिधिनावं भक्तिसिद्ध्यै भजेऽहम् ॥

तु जयतु धीमान् वेङ्कटाख्यश्च सूरिः
भुवि विहरतु काव्यं तस्य नौकाचरित्रम् ।
विभुनरहरिदेवप्रीतिपात्रं मनोज्ञं
समधुरकाव्यं रस्यतां भावविद्भिः ॥

इह खलु धर्मार्थकाममोक्षार्थिषु मोक्षर्थिनामेव परमपुरुषार्थित्व प्रतिपादित काले कालेऽवतीर्णैः परमाचार्यैश्शङ्करभगवत्पूज्यपादादिभि । साधनान्यप्युपदिष्टानि तस्य श्रद्दधानाना सुलभसाध्यानि । तेषु साधनेष्वतिसुलभमचिरादेव फलमावर्थितृत्वादत्युत्कृष्टा मता परमात्मभक्ति । स च परमात्मा निजभक्तमनोऽभीष्ट पूरयितुकामस्तस्येष्टरूप दधानस्तद्धृदि विहरति । रूपारूपयोगिहृद्दहराकाशविराजमानतेज पुञ्जस्वरूपी मनोहर-

स्तथा विहरमाणस्सदा मोद जनयति । तथाप्येतद्धिया केषामपि ब्रह्म-
जिज्ञासूना मतानुभवश्रमविकारो मदोऽप्यकस्माज्जायेत ॥

बहुविचित्रे कृष्णचरित्रे दृश्यन्तामस्य सन्दर्भस्यासख्यानि
हस्तामलकहृदयङ्गमान्युदाहरणानि । भगवान् श्रीवासुदेव पुनरावृत्ति-
रहितमहायोगिहृदयाभिर्गोपिकाभिराधृतस्तासा तद्वियानन्दास्वादोद्भवमो-
दमदमोहनिवारणलक्ष्या यमुनाम्भस्सु ताभिस्सह सलील नौकाविहार-
कौतुकव्याजेनाव्याजकरुणार्द्रहृदय —

**"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ॥"**

इति गीताप्रपादितस्वोपदेशरहस्य सन्दर्भनिरूपणेन प्रत्यक्षप्रमाणीचकार ॥

स चेश्वरभक्ताना रुचिरा विषयो गान्धर्वरसभावादिकुसुमप्रफुल्लक-
विताकमलिनीविहारिमौनेन वाग्गेयकारराजेन त्यागराजेनान्ध्रभाषाया
"**नौकाचरित्राख्ये**" गेयनाटकप्रेक्षणके सन्दब्ध इति रसिकलोक-
प्रसिद्धम । तच्च नाटक मद्रपुरीसर्वकलाशालासङ्गीतविभागाध्यक्षपीठामर-
णायमानैर्गान्धर्वकलाशास्त्रपारङ्गतैर्ब्रह्मश्री**साम्बमूर्त्यार्या**चार्यवर्यैरष्टा
भ्यो वर्षेभ्य पुरा सशोध्य सस्वरनिबद्धकीर्तन सद्भावितवात्पर्य सराग-
लक्षणविवरण सम्यक्परिष्कृत्य सपादित तैरेव प्रकाशित विद्वद्गणसुविदित-
मस्ति ॥

सैषा कृष्णगोपिकानौकाविहारवस्तुका गोपालशृङ्गारलीलारहस्यरस-

शब्दचित्रार्थवाच्यचित्रादिसर्वालङ्कारभूषिते चित्रितासीत् केनापि महात्मना **श्रीमत्कविवेङ्कटसूरिनाम्ना** । एष कविश्श्रेष्ठोऽप्यद्यप्यपेङ्गाप्रान्तस्थरामचन्द्रपुराख्यग्रामे सौराष्ट्रदेशस्थविप्रकुले पवित्रीकृतमतङ्गर्षिगोत्रस्य यजुश्शाखाध्यायिनो महाविदुषश्श्रीनारायणशर्मणस्तस्य सहधर्मिण्याश्श्रीमत्या रङ्गनायक्याश्च तपःफलरूपोऽवतीर्णो महात्मा । समस्तविद्यासपूर्णोऽयं **श्रीमद्भूपतीर्थाशर्मा**चार्यवर्यं महान्तं यतीन्द्रमाश्रित्य बहुशुश्रूषमाणोऽपि तेनोपदेष्टुमानसस्तन्मुखाद्गृहीतवान् ब्रह्मविद्योपदेशमवश्य ब्रह्मरन्ध्रसरसीरुहोदरनित्यलग्नब्रह्मज्ञानदेशिकानुग्रहसपूर्ण । स च सकलहृदाह्लादप्रह्लादयोगीश्वरवरप्रदलक्ष्मीनृसिंहचरणकमलध्यानशील —

> “ **एकैव शक्तिः परमेश्वरस्य**
> **भिन्ना चतुर्धा विनियोगकाले ।**
> **भोगे भवानी पुरुषे च विष्णुः**
> **कोपे च काली समरे च दुर्गा ॥** ”

इत्यागमिकोपदेशात् प्रपञ्चाकारव्युत्पत्तिपरिच्छेदविनाशनलक्ष्या या करुणासिन्धोर्दक्षिणकालिकाया प्रपन्नपराधीनता प्रकटीकुरुते स निग्रहानुग्रहादिकं खलु सर्वं पारमात्मिकसूक्ष्मशक्तेः कारणकार्यकलना स्वाभाविकं दृष्टान्तमनुभवसिद्धं जपयाजिनाम् ॥

तथैव चाह गुहानुभूतिपरमानन्दरसास्वादो महानरुणगिरिनाथ परमहंस —

“ தரணிபி லரணிய முரணிர-
ணியனுடல தஜொநக நுதிகொடு
சாடோஙகு நெடுஙகிரி
யோடேநது பயஙகரி. ”

(தேவேந்திர சஙக வகுப்பு)

उक्तञ्च कालिकाक्रमस्तोत्रे—

**“ पुनस्तथा कूर्चयुगं जपन्ति
भवन्ति सिद्धा नरसिंहरूपाः ॥ ”**

ब्रह्मध्यानयोगधारणासमाधिपरस्य तस्य हृदये लक्ष्म्या सह सानन्दं विहरन् भगवान्नृसिंह प्रशान्तवाग्विभवमतिविपुलमति निजपद-कमलयुगपूजानिर्भरासक्तिश्च दत्तवान् मुदा परया तस्मै अनुग्रहार्हवरिष्ठाय। किन्न सिध्येद्गुरौ हरौ प्रसन्ने! वरकविश्चायं गान्धर्वोद्धारणावताराणां त्यागराजयतीन्द्राणां शिष्यधुरीणस्य श्रीमद्वेङ्कटरमणभागवतस्यान्तेवासी सन् गान्धर्वञ्चाधीतवान्। भावरागतालसुमहत्तराणि चास्य कीर्तनानि रञ्जयन्ति रसिकान् ॥

अस्य महापुरुषस्य चरितसम्बन्धीनि विषयान्तराणि “ सौराष्ट्रविप्रबन्धु”रिति बिरुदभाजा कु. वे. पद्मनाभार्येण द्राविडभाषायां विरचिते सौराष्ट्रसभाप्रकाशिते “ श्रीमत्कविवेङ्कटसूरिस्वामिचरित्र ” इत्याख्ये पुस्तके द्रष्टव्यानि जिज्ञासुभिः। बिरुदेन सौराष्ट्रविप्रबन्धुरपि वस्तुतस्सर्वविप्रबन्धुर्ज्ञाता वक्ता कविहृदयो दानशीलो दयात्मा सत्यवाग्धार्मिकश्च

महान परोपकारी दृश्यतेऽसौ । "भगवद्गीतासार" इत्याख्ये द्राविड
पुस्तकान्तरे गद्यात्मिके संक्षेपेण विषयसारमात्रसङ्ग्रहविवरणेनासौ स्वप्रति
भया ब्रह्मजिज्ञासूनुपनयति कृष्णोपदिष्टब्रह्मज्ञानं प्रति । "सत्सङ्ग
निस्सङ्गत्वं" इत्यादिर्गीतवन्तो महान्तो भगवत्पूज्यपादाश्शङ्कराचार्य
वर्यास्सत्सङ्गादारभ्य सोपानक्रमेण जीवन्मुक्त्यन्तमुपदिष्टवन्तस्संसृतिमोक्ष
सुलभमार्गम् । एतावन्तो महनीयगुणवन्तो विप्रबन्धुपञ्चनाभार्यसदृश
लोके विहरन्ति सर्वदा सत्सङ्गार्हप्रत्यक्षोदाहरणभूता ॥

किं च सद्गुरुश्रीत्यागराजतच्छात्रवर्गस्वहस्तलिखितपुस्तकादीनि
पोतनभागवतादिकाव्यकीर्तनचरित्रगानवर्वलक्षणग्रन्थमन्त्रतन्त्रज्योतिषशा-
स्त्रेत्यादिबृहितानि विविधानि ग्रन्थरत्नान्यनर्घानि श्रीमद्वेङ्कटरमणभागवत
वंशोद्भववंशस्थानि कतिपयेभ्यो वर्षेभ्य पुरा स्वीकृतानि मधुरानगरीस्थय
सौराष्ट्रसभाख्यया साहित्यपरिषदा । लोकोपकारार्थं वशीकृते ग्रन्थस
तस्मिन्नान्ध्रलिपिलिखित दृष्टमिदं "**नौकाचरित्रं**" नाम का
**श्रीमत्क वेङ्कटसूरि**विरचितम् ॥

एतद्ग्रन्थप्रकाशनविषये बहुशश्शोपकृतवतस्सौराष्ट्रसभानिर्वाहकस
श्रीमत पी. एस्. ए कृष्णार्यस्य साहित्योद्धारणपोषणविषयदत्ता
परोपकारचिन्तामणेस्साहाय्य न विस्मार्यम् ॥

कवितारसनशीलसद्भक्तमानुषमानसानन्दनलक्ष्येण मया सपदि
श्रम मधुर मपाठितमिट महृदयहृदयानन्दन काव्यमं मात्र प्राकृ

मनुभूयता रसिकलोकमान्यैर्विद्वद्भिः । हंसक्षीरन्यायेन मया समर्पितमिदं ग्रन्थरत्नं मत्सरमपहायाङ्गीकुर्य मा कु तथा हि—

" पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥ "

इति वितर्कमुक्तवान् **मालविकाग्निमित्रे** महाक कवित्वामृतनदीनदीनो महात्मा श्रीमत्कालिदास करुणार्द्रा कालिकाकटाक्षवीक्षणपात्रभूतो निर्भरभक्तिमतां वरिष्ठः । का चन्द्रार्कं निखिलरसिकजनजातानन्दवर्धनं सहृदयविद्वन्मण्डले रङ्गरङ्गमित्यखिलभुवनभर्तारं लक्ष्मीनृसिंहं प्रार्थयेऽहम् ॥

इति शम् ॥

मद्रपुरी ।
सर्वजिच्चित्रापूर्णिमा ॥

**पै. कृ. राजगो**

# PU LISHER'S OTE.

It was a full moon Lord Sri Krishna was in a boat on Yamuna Gopis were with him Conscious of the Lord's special favours, they were in an egoistic mood. The Lord, in His supreme mercy, wanted to correct them. "Nowka Charitra" describes how He did it.

"Nowka Chitra" was orginally composed by Sri Thyaga Brahmam in Telugu Later, it was rendered in the Sourashtra language by Budda Alagar Arya of Salem. Maha. kavi Venkatasuri has rendered it in Sanskrit in an exquisite way

It is said that Sri Venkatasuri's production elicited the admiration of Sri Thyaga Brahmam himself. No wonder, then, that it is regarded by Sanskrit Scholars as an inspiring intellectual treat of a very high order

On behalf of my Committee, I tender my most greatful thanks to Sri P. Sambamurthi, Head of the Department of Indian Music, University of Madras, for his very impressive foreword, to Sri P. K. Rajagopal Ayyar of Sangeetha Siromani Kalasala of Adyar, for all the trouble that he took to go through the original and in getting it printed as much as for his beautiful preface and to Sri P N K. Subburama Ayyar, of Madura for the financial help rendered by him in bringing out this publication.

MADURA,
16—5—47.

**P S. A. Krishnier,**
*Convener & Correspondent,*
The Musuem & Sahitya Committee,
SOURASHTRA SABHA


ॐ

॥ श्रीराम प्रसन्न ॥

# अथ श्रीमत्कविवेङ्कटसूरिणः कृतौ

# नौकाचरित्रे

## प्रथमस्सर्ग



श्रियं न श्रीगौरीवदनवनजार्को वितरतु
श्रितानां सन्तानां द्विरदवदनोऽप्येकरदन ।
प्रभूतप्रत्यूहाचलदलनदम्भोलिरनघ
प्रभातप्रोन्मीलन्नलिनमदहुङ्कारिचरण ॥ १ ॥

तथा मे माधुर्यं किर वचसि वागीशदयिते
दयापूर्णापाङ्गे श्रितजननि देवा दिवि यथा ।
भवेयुर्माधुर्यं निमिषमनुभूयेदमतुलं
कणादेवास्याजन्यमृतमिति न निर्धारितधिय ॥ २ ॥

यतो जन्मस्थेमप्रलयवदिदं दृश्यमखिलम्
यमाहुर्नीरूपं निगमनिपुणा निर्गुणमपि ।
भजन्ते सम्मोदं मनसि यमलं वीक्ष्य यमिन
स मे कल्याणाय प्रभवतु भवाम्भोधितरणि ॥ ३ ॥

त्यक्त्वा सन्देहकोटिं भयलवमभजन् लीलया सानुरागं
वाचातीतं विजेतु हरिमहमिह मद्वाग्विसर्गैर्यतिष्ये ।
यद्गोपीभिर्जनन्याप्यतिरभसमसौ यन्त्रितस्सप्रमोदं
सामर्षं विश्वमूर्तिः श्रितकृतकरुणो व्यामतो दामतश्च ॥ ४

याचे स्तुवन् कविवरान् रचयेऽहमद्य
नौकाविहारचरितं नृहरेः पवित्रम् ।
न्यूनातिरिक्तमिह यद्यपि तत्समस्तं
क्षन्तव्यमेव ननु तैः करुणार्द्रभावैः ॥ ५ ॥

भूभारोत्तारणाय प्रथितयदुकुले देवकीगर्भसिन्धौ
जातो यातो यशोदाप्रियतनुभवतां ह्लादयन् गोपकन्याः ।
ब्रह्मेशानामरेन्द्रप्रभृतिसुरवरैस्सादरप्रेक्षणीयां
नौकाक्रीडां वितेने हरिरहह सह स्त्रीभिराभिस्सहेलम् ॥ ६

श्रुत्वा तस्य मुहुर्मुहुर्मुररिपोश्चारित्रमत्यद्भुतं
स्मृत्वा तच्च पुनः पुनः श्रुतिसुखं तस्यैव चिद्रूपिणः ।
तत्राभीरवधूजनैश्चिरधृतं स्वात्मीयगेहादिकं
ब्रह्मज्ञैर्निरहममैरिव परं सर्वं ह्यहो विस्मृतम् ॥ ७ ॥

नूनं स्वतन्त्र इति नाम हरेः प्रसिद्धं
यत्तत्स्वभक्तपरतन्त्र इतीह जातम् ।

प्रागेव यद्व्रजवधूहृदयं विदित्वा
    नौकाविहारकुतुकी स बभूव कृष्ण ॥ ८ ॥
मुररिपुरथ वेणुं स्वस्य विन्यस्य चौष्ठे
    निजमुखमरुतासौ पूरयन् सप्रमोदम् ।
    नरमृगादीन् मोहयन् सुस्वर हा
    सरिगमपधनीति स्वैरमुद्गायति स्म ॥ ९ ॥
अधरनिहितवेणोस्तस्य हस्ताग्रशाखा-
    क्रमपिहितविमुक्तच्छिद्ररुद्धोत्थिताभिः ।
मधुररवसुधाभिर्निर्वृत तत्र सर्वं
    हरिविरहविहस्तस्त्रीसहस्रं विहाय ॥ १० ॥
हृष्यत्सु तत्र सकलेषु चराचरेषु
    खेद ययुर्युवतयस्त्विति यत्तदेतत् ।
तस्याधरं मधुरिपोर्मधुरं विलज्जा
    कान्येयमद्य मुरली पिबतीति नूनम् ॥ ११ ॥
तद्वेणुगानामृतपानमत्ता
    वि मुहुस्तद्विरहाङ्कुशेन ।
वीथीस्तमन्वेष्टुमुपागमंस्ताः
    विष्वग्गवाक्षान् विकिरन्त्य एव ॥ १२ ॥
वीथीं ययौ सोऽपि मुदा तदानीं
    नि काम स्पृहयन्निवाशु ।

मुक्ताफलान्यञ्जलिना गृहीत्वा
　　प्रसारितापाङ्गतरङ्ग एव ॥ १३ ॥

चलद्भिरलकैरथ क्षणवियोगभयोभृत्
　　मुखं ददृशुरम्बना मुरहरस्य गोपाङ्गना ।
यथा दिवि शरद्घनैर्द्रुतविमुक्तपङ्काछादितं
　　तुषारकरमण्डलं तृषितसञ्चकोराङ्गना ॥ १४ ॥

दृष्ट्वा नवं नवमिवागतमच्युतं तं
　　हृष्टा परं सपदि तत्र समेत्य सर्वा ।
एह्येहि मे भज भुजान्तरमित्यनेन
　　साकं ययुर्युवतयाऽन्यविहारदेशान् ॥ १५ ॥

हसन्ती सत्येका चलितपृथुवक्षोजयुगलं
　　सुमं विन्यस्यन्ती शिरसि सशिरःकम्पमपरा ।
समीकुर्वन्त्यन्या निजकरनखैस्स्वैरमलकान्
　　वहन्तीं संवेष्ट्य प्रययुरभितः कृष्णमबलाः ॥ १६ ॥

काचिच्चुम्बति काचिदाह्वयति तं काचिन्मुहुः प्रेक्षते
　　काचित्तर्जयति भ्रुवा समदनं काचित्समालिङ्गति ।
काचिद्दर्शयति स्तनौ स्वहृदयं व्याख्याति काचिद्दृशा
　　वीटीं काचिदुपाहरत्यथ हरेर्भाग्यं ह्यहो योषिताम् ॥ १७ ॥

क्ष्यति मत्प्रियो मयि रतो मामीक्षते मत्प्रभुः
मानाथो मदनस्स्वयं मम गुरुर्मत्पूर्वपुण्योदय ।
णा मम भूषणं मम धनं नाथोऽनुरूपो ममे-
त्यानन्दातिशयेन तत्र नृहरिं गोप्योऽन्वगच्छंस्तदा ॥ १८ ॥

प्रनृत्यन् प्रहसन् प्रगायन्
आनन्दसिन्धौ सुभृशं निमज्जन् ।
ायोक्त्यैव हरिं तदासौ
स्त्रीणां समाजो यमुनामगच्छत् ॥ १९ ॥

क्रीडन्मरालीततधुतगरुदुद्धूतवाताविधूत-
व्याकोचाब्जातजातोत्पतितमधुकरीव्रातमञ्जीतविद्याम् ।
ाघन्ते शिरोभिस्तटतरुनिवहाः पश्यता गच्छतेति
प्रत्युद्गम्य प्रणीता इव मृदुमरुता तास्स्त्रियस्तामपश्यन् ॥२०॥

हंसभ्रान्त्या व्रजति वरटा सैकतमहो
मुहुः पद्मावल्या स्मरति मधुपालिस्स्वसुकृतम् ।
च्छाया साम्यं भजति हरिनीलस्य महसा
तरङ्गालिर्यस्यास्स्पृशति मणिसोपानमसकृत् ॥ २१ ॥

प्राप्य तामद्भुतां रम्या
कालिन्दीं काममोहिता ।

कामिन्यः कामुकं दृष्ट्वा
कृष्णमन्योन्यमब्रुवन् ॥ २२ ॥

कुञ्जभ्रमद्भ्रमरझङ्कृतिटङ्कृतीभिः
दृप्यन् लतागुणसुयोजितपुष्पबाणैः ।
प्रादुर्बभूव पिकनिस्वनवीरवादैः
मारो मृदुश्वसनसारथिरद्य कष्टम् ॥ २३ ॥

मिहिरदुहितुरासां पश्यतीनां (?) विनोदं
पयसि रचितनौका दृक्पथे काप्यथाभूत् ।
शमयितुमरिवर्गं सन्निनाना हरौ द्राक्
व्रजति निमिषशून्या शेषशय्येव सिन्धौ ॥ २४ ॥

राकाचन्द्रसमश्लोका
नौकां तां प्रेक्ष्य तज्जले ।
हर्षचिन्तासमायुक्ता
कान्ता ऊचुरिदं मिथः ॥ २५ ॥

विहर्तुमधिरुह्य सुखेन नीरे
नीले यमस्वसुरियं तरणिस्तु हृद्या ।
: कथं मुररिपुर्नयतु (?) सहाद्य
बालो नृपालतनयो मणिभूषणोऽयम् ॥ २६ ॥

नीरे शौरिमयुक्तमद्य नयतु (?) हा कि सुखं त विना
कि वा वक्ष्यति नो रुषास्य जननी को वात्र निर्वाहक· ।
दुर्वादो भुवि दुर्जयोऽजनि यदि क्रीडान्यथास्यात्र कि
हा कष्ट हि वशेन तिष्ठति हरिर्नेय कथ वा द्रुतम् ॥२७॥

इत्यालोच्य नभ. प्रेक्ष्य
रविरस्तं भजेदिति ।
गमने त्वरमाणास्ता
नौकामभिययुस्स्त्रियः ॥ २८ ॥

विनात्मान यियासूनां
अनाहूतस्तदा हरि ।
तासा व्यवसितं बुद्ध्वा
प्रोवाच तदिद वच. ॥ २९ ॥

गोप्य. क पुरुष विना क्वचिदपि स्त्रीणा श्रुत साहस
न स्थेय तरुणीजनस्य विहृतो केनापि यूना हरे ।
हा कि ब्रून बलाद्रसो न हि सुखं स्वप्नेऽपि तस्य क्वचित्
नैवं न· परयोषितस्तव वचो युक्त विनोदेन वा ॥ ३० ॥

युक्तं वोऽभिहित मया युवतयः क्षेमाय नैवान्यथा

हा गोप्यो बत मद्विना तृणमपि क्षोण्यां चलेद्वा क वा
सत्यं यद्यपि चिन्तनीयमबला ह्याजाननो मीरव ॥ ३१ ॥

नेताहमस्मि निखिलेन गवामिहैक
स प्राणिनामिव हरिर्न विदुर्भवत्य ।
न त्व किशोर इति विश्वमनीयभाव
प्रख्यातमेतदयि किं न विदुस्त्रियोऽमू ॥ ३२ ॥

इति प्रयुक्तिभिस्तासा
प्रत्याख्यानोऽपि सादरम् ।
प्रत्ययार्थमिद भूयो
जगाद वचन हरि ॥ ३३ ॥

सत्य मद्वचन न पथ्यमिह व क्रीडा जले सर्वथा
नावा वापि भवेद्विना यदि मया सिन्धूदसञ्चारिणा ।
नित्यं स्यादयशो भुवीदृशमहो कृत्य वधूभि कथ
मा कार्यं ननु बोधना बलमिद हा कस्य न ज्ञायते ॥३४॥

श्रुत्वा वचस्सपदि तस्य हरेस्तदेतत्
मत्वापि तथ्यमिति सर्वमहो विमुग्धा ।
ध्यात्वा क्षण चरितमस्य पुरानुभूतं
स्मृत्वा पुनर्वचनमीदृशमब्रुवस्ता ॥ ३५ ॥

मज्जन्तीनां रहसि वयसि स्वैरमर्कस्य पुत्र्यां
रन्ध्रान्वेषिन्न किमपहृतान्यंशुकानि त्वया न ।
हा विन्यस्यन् तिलकमलिके त्वं पुरा सादरं मे
दुर्ज्ञेयात्मन्नवरमदृशं किं न तद्विस्मृतं वा ॥ ३६ ॥

कियदिह नवनीतं भुक्तमित्येव पृष्ट-
स्त्वियदिति मम बाह्वोरन्तरं नास्पृशः किम् ।
स्मर नवनवनीतं भुक्तशेषं निधाय
क्व मयि शरबिडालः प्रेषितो निद्रितायाम् ॥ ३७ ॥

आस्ये विलिप्य गतवान्न किमङ्ग मे त्वं
भुञ्जान एव नवनीतमहो तदास्ताम् ।
नूत्नार्तवेऽग्रजमनांसि सहैव मुष्ट्वा
हा मे रहः किमकरोस्स्मर वञ्चक त्वम् ॥ ३८ ॥

चोरश्चिरादिह गृहीत इति स्ववेश्म-
न्याधाय सम्यगररं स्थिरमेव बद्ध्वा ।
गत्वा रयेण जननीसविधेऽपि सन्तं
त्वां वीक्ष्य किं किमयि न स्मृतमङ्गनाभिः ॥ ३९ ॥

त्वद्वेणुगानकलया न वशीकृतं किं
यज्ञे पुरा स्मर स यज्विवधूजनोऽपि ।

पौरैः पुरन्दरबलिं विरचय्य तुभ्यं
वर्षे महत्यपि चिरं वद न स्थितं वा ॥ ४० ॥

सत्यं मयोक्तमिति यद्वदसीह नस्त्व
जानीमहे तदखिलं नयतु (?) किल त्वाम् ।
हा तेषु तेष्ववसरेष्वयि यद्यदुक्त
तत्तन्न तथ्यमिति वा कुटिल न तद्वा ॥ ४१ ॥

इति तासां हरिर्वाक्यै-
रर्दितस्स पुनः पुनः ।
पुष्पवृष्टिसमस्पर्शै-
रिदं वचनमब्रवीत् ॥ ४२ ॥

अप्रस्तुतैः किमु वचोभिरिहोपयुक्तं
मामेव संश्रितवता किमु दुस्तरं स्यात् ।
। लम्ब्य तरन्ति लोकाः
संसारसागरमपोहशसिन्धुरास्ताम् ॥ ४३ ॥

मग्नोऽम्बुधावपि मया न किमुद्धृतोऽद्रिः
ग्राहो गजेन्द्रमुपरुध्य न किं निकृत्तः ।
सोमश्च किं न निहतो निगमापहारी
ोदरोऽपि किमितो न विवासितोऽभूत् ॥ ४४ ॥

पुत्रं निमोलितमहो पुनरेव भेजे
सान्दीपनिस्तदपि किं न ममैव यत्नात् ।
मद्बाहुशौर्यमविकुण्ठितमप्रतर्क्यं
सत्यं ब्रवीमि तदलं हृदि संशयैर्वः ॥ ४५ ॥

इति तद्वचनं श्रुत्वा
क्षणमालोच्य तास्स्त्रियः ।
सत्यमेवेति निश्चित्य
तुष्टुवुर्मनसा हरिम् ॥ ४६ ॥

इति श्रीमत्कविवेङ्कटसूरिणा कृते

**नौकाचरित्रे**

प्रथमस्सर्गः ॥



॥ श्री ॥

# अथ श्रीमत्कविवेङ्कटसूरिणः कृतौ

# नौकाचरित्रे

## द्वितीयस्सर्गः

ततोऽतिधैर्यमालम्ब्य
सहसा स वधूजनः ।
सन्ननाह तदा नौका-
मारोढुं सह शौरिणा ॥ १ ॥

अथ दिवमुपसर्पन्त्यप्रभा भास्वनेव
ह्यहमहमिकया तां नावमारोहतीस्ताः ।
सरभसमनुयानं शौरिणा प्रेक्षितुं तत्
नभसि च समवेतं स्वर्वधूभिः क्षणेन ॥ २ ॥

नीवीं सम्बध्य गाढं द्रुतगतिशिथिलं द्राक्समीकृत्य गात्रे
विन्यासं भूषणानां स्मितरुचिलहरीप्रस्फुरच्चारहाराः ।
स्कन्धान्तात्केशपाशोच्छुरितसुमनसः सम्यगाकृष्य बद्ध्वा
चेलान्तास्तास्तदानीं झटिति युवतयः कर्णधारीबभूवुः ॥ ३ ॥

जल्पन्त्यो नृहरेः कथाः प्रतिमुहुस्सम्प्रार्थयन्त्यो नदीं

पश्यन्त्योऽम्बुनि तत्र तत्र शतश पद्मोत्पलाना वनीः
गायन्त्या मधुर रयेण तरणि सञ्चोदयन्ति स्म ताः ॥ ४ ॥

चलापाङ्गे किञ्चित् प्रसरति-विलीना झषगणा
स्मितेऽप्याविर्भूते विकसितमभूदुत्पलवनम् ।
उपक्रान्ते गीते सपदि मधुपा दूरमगमन्
पुरा वक्त्रे स्त्रीणा सरयमपतन् ये च विवृते ॥ ५ ॥

दण्डक्षेपवलद्भुजाग्रवलयप्रत्युप्तरत्नप्रभा-
जालालातनिपातशङ्कितरटद्द्रावज्जलेभच्छपाः ।
एतद्घोरतराभिटीशमितनत्तत्क्षुद्रयादोगण-
व्यापारा समचोदयन् पयसि ता नौकामभीकस्त्रियः ॥ ६ ॥

स्वेदक्लिन्नमृगीमदश्लथकचप्रभ्रंशिपुष्पोत्कर-
व्यालोलालकतारहारमसकृद्विस्रस्तरुद्धांशुकम् ।
हृष्यत्कङ्कणनिक्वण स्तनतटप्रभ्रष्टचेलाञ्चल
नौकाया परिवर्तनेन तदभूत्सर्वं वधूमण्डलम् ॥ ७ ॥

तत्रामोदहिमोदमिश्रितघुसृणाटीरपङ्कोत्तमै
अन्योन्य परिदिग्धबाहुलतिकाः सद्रत्नभूषोज्ज्वलाः ।
बिभ्राणास्सुममालिकास्सतिलका धूपैर्वरैर्धूपिता
सामोद कृतवीटिका युवतयस्स्वर्ग वृथा मेनिरे ॥ ८ ॥

तथारमत सर्वात्मा
तत्र स्त्रीषु हरिर्यथा ।
मय्येव रमते शौरि-
रिति मन्येत तज्जनः ॥ ९ ॥

गृह्णाति क्वचिदञ्चले क्वचिदलंकर्षत्यसौ कुन्तले
फाले न्यस्यति चित्रकं किरति च प्रालेयतोयं स्तने ।
वक्त्रे चुम्बति कुत्रचित् स्पृशति च काप्यङ्गुलीभिः कटिं
तत्रैव नृहरिर्वधूसमुदये पूर्णत्वमाशंसति ॥ १० ॥

क्वचिदीक्षनेऽधरसुधामाकाङ्क्षते च क्वचित्
वक्षोजेषु नखक्षति वितनुते ज्ञात्वाशयं भाषते ।
न्त भजते क्वचित्क्षणमसौ सीताङ्क एव क्वचित्
सर्वासामपि योषिता स रमते सान्निध्य एव प्रभुः ॥ ११ ॥

क्रीडन्नाभीरकन्याभि-
र्भानुकन्याम्भसि प्रभुः ।
बिनोदमकरोदेव
वाकेलिधृतकौतुकः ॥ १२ ॥

वेण्यां कर्षति कोऽयमत्र शठ मे हा चुम्बसि त्वं
शैवाल ननु कर्षित न किमयि स तमम्भोरुहम् ।

हा मां वञ्चयसि प्रमत्त न तथा हत्वा स्तनौ ते शपे
प्रज्ञाने क तवोरुमूलमविशद्धा हन्त कि कुर्महे ॥ १३ ॥

हा रे क्रूर कुचं मम स्पृशसि कि बालेन कि कुड्मलं
चक्षुस्ते क तवाशुक क नु गतं वेणीसमाबन्धने ।
स्रस्तं किञ्चिद्‌तो नु तद्भ्रममगाद्वाचाटयुक्त न ते
सत्यं ताडयने न मामिति गिरा कृष्णस्य सा विस्मिता ॥१४॥

पश्यावोऽब्जवनं तथैव सखि हा कि वा पतन्नेत्रयो·
मुग्धे सारसकेसर· किमधरे दष्टं सखोन्दिन्दिरै. ।
चेल कर्षति कोऽस्ति भीरु पवनः किं वाप सी-
त्याक्लिष्टस्समिया कयापि सुदृढ कृष्णोऽत्र योषाकृतिः ॥१५॥

इति तत्र हरिं स्त्रीषु
रममाण यथामतम् ।
अतोषयन् विरिञ्च्याद्याः
सौवर्णसुमवृष्टिभिः ॥ १६ ॥

बद्धा श्चलमलं स्मितपूर्णगण्डा.
। कचेषु कुसुमानि गृहीतदण्डाः ।
प एव नृहरिं तदपत्यलीला
गा एव तरणिं समचोदयंस्ताः ॥ १७ ॥

एवमावर्तयन्तीना
नावमाभीरयोषिताम् ।
आनन्दातिशयेनैव-
माविरासन् मिथोगिर ॥ १८ ॥

अहो नस्सौभाग्य वसति मयिचेऽत्रैव नृहरि
परीरम्भारम्भे भजति भुजयोरन्तरमपि ।
यथा काम काम दिशति मधुरा नोऽधरसुधा
गिरा दूरे शौरेर्जयति रतितादृग्विधसुखम् ॥ १९

अहो नस्तारुण्य स्मरपितुरधीन विजयते
तथेद लावण्य वसनमणिभूषोज्ज्वलमपि ।
यदेतन्नैपुण्यं रतिषु बत न श्लाघ्यमभवन्
मुरारे कारुण्यात्तदिह सफल जातमखिलम् ॥ २

एवमाभीरभीरूणा-
माकर्ण्य मधुरा गिर ।
स्वराडपि सुखी वै तै-
रब्रवीत्तदिद हरि । ॥ २१ ॥

अहो मन्दं मन्द मलयमरुदावाति शिशिर

हेदानीं धन्यस्स्फुटमनुभवत्येष तदिदं
   वधूना सौन्दर्यं शतमखमुखानामसुलभम् ॥ २२ ॥

व प्रशस्य बहुधा नृहरिस्स्वभाग्य
   भाग्यं श्रियोऽपि स वधूहृदय विदित्सु ।
ण्डान् विनिक्षिपत भो करभोपमोर्वः
   पश्चादित परमिति प्रहसञ्जगाद ॥ २३ ॥

आकर्ण्य वचनं तस्य
   स्मितपूर्वमुदीरितम् ।
मत्वा तत्कुटिल योषा
   रोषादिदमथाब्रुवन् ॥ २४ ॥

ा कि जल्पसि साधु साधु विदित चेतस्त्वदीय हरे
   बाल सान्त्वयसि क्षति विरचयन् गात्रेषु डोलादिभि· ।
का वा त्वामयि विश्वसेदलमल वाचानया ता दृढं
   बध्द्वा निक्षिप दूरतो न चलति ह्यस्मासु युक्तिस्तव ॥ २५

ष्ट्वा तवाधरसुधारुचिरं मुखाब्ज
   श्रुत्वा च ते श्रुतिमधूनि वचासि मोहात् ।
मायात्वनेन क उपाधिरिति स्थितास्म
   प्रागेव नैवमिति नो विदित मतं ते ॥ २६ ॥

एव वचोभिर्बहुधा
क्रूरैस्तास्तमवाकिरन् ।
तीक्ष्णधारैरिवाम्भोभि-
स्सुमेरु मेघपङ्क्तय ॥ २७ ॥

त्रिदशविभुसभाया पुण्ययोषित्प्रपञ्च-
स्त्रिपुरहरसभाया प्रेतभूतप्रपञ्च ।
जलजभवसभाया मौनिभिक्षुप्रपञ्च-
स्त्विति नृहरिसभायामूचुराभीरकन्या ॥ २८ ॥

तत्रानुलेपनमणीमयभूषणस्र-
क्ताम्बूलदिव्यवसनैस्समलङ्कृतास्ता: ।
कान्तास्स्वरौप्यतरणौ हरिणा विरेजु·
काम स्वकीयसरणौ शशिनेव तारा ॥ २९ ॥

आश्लिष्यन्त्य: प्रतितटि मिथो भावयन्त्योऽब्जनाभ
निध्यायन्त्यस्सरसमनघ चेष्टयन्त्योऽङ्गकानि ।
उद्गायन्त्यो मुहुरपि कल द्योतयन्त्योऽनुराग
ता· क्रीडन्त्यस्सुसुखमसुख विस्मरन्ति स्म मुग्धा ॥ ३० ॥

सौन्दर्यातिशयेनाथ
भवि [illegible]

स्वसमानमनालोक्य
सगर्वमिदमब्रुवन् ॥ ३१ ॥

विधिहरहरयो वा शक्रमुख्यास्सुरा वा
कचकुचवदनानां वीक्ष्य नो रूपलक्ष्मीम् ।
विगलितधृतिसारा किं भजेयुर्न मोहं
विधुतमहितभावा किं भवेयुर्न नम्राः ॥ ३२ ॥

ब्रह्मापि स्वसुतां समीक्ष्य सहसा मोहाटवीं प्राविश-
द्वृन्दां वीक्ष्य पुरा पुराणपुरुषोऽप्यज्ञोचकार भ्रमम् ।
सर्वज्ञोऽपि स दारुकावनवधूमोहान्धकारेऽपत-
त्पाशं शौरिरिहापि नस्समगमद्भाग्यं वधूनामहो ॥ ३३ ॥

आनन्दातिशयेनैव-
मानन्दनिधिसन्निधौ ।
नार्यो मदवशादूचु-
र्विवशास्तदिदं पुनः ॥ ३४ ॥

जानीते रतिमञ्जसानुभवितुं मिथ्यागिरं प्रब्रुव-
ञ्जानीते स्फुटमेव मोहयितुमप्यालोकिते स्त्रीजने ।
जानीते किल पृष्ठतोऽन्वटितुमप्यालोक्य नस्सौभगं
जानीते कथमेष चालयितुमत्रैतां स नौकां शिठः ॥ ३५ ॥

तत्रैव रममाणाना

तासामानन्दमद्भुतम् ।

नाल स्मर्तुमपि ब्रह्मा

वक्तुमन्ये कियद्धिया ॥ २६

इति श्रीमत्कविवेङ्कटसूरिण कृतौ

चरित्रे

द्वितीयस्सर्गः ॥

---

॥ श्री ॥

# अथ श्रीमत्कविवेङ्कटसूरिणः कृतौ
# [illegible]चरित्रे

## तृतीयस्सर्ग ॥



श्रुत्वाथ वचन तासां
सौन्दर्यमदगर्वितम् ।
चिन्तयांमास निमिषं
स्वान्त एव तदा हरिः ॥ १ ॥

उन्मस्तक मदमसौ तरुणीजनाना-
न्देवो न तारयितुमत्र विचित्रशक्तिः ।
मेनेऽतिवातघनगर्जितभीकरोरु-
वर्षान्धकारसमुदञ्चितरन्ध्रतोयैः ॥ २ ॥

मेने यथा हृदि वधूनिवहोरुगर्व-
निर्वापणाय निगमान्तविचारवेद्यः ।
तेने तथैव सहसा सुरमं निकाय-
[illegible]ोदितो [illegible] हृदि [illegible] ॥ ३

शान्तक्षेपणिताण्डव सरभसव्यालीनगानारव
शङ्कातङ्किमनोऽङ्गनासमुदय सच्छिद्रनौकातलम् ।
जज्ञे दुस्सहदुर्निवारतरणिस्वच्छन्दचार तदा
दुर्वाताम्बुदघोषभीषणमहद्वर्षं नभोमण्डलात् ॥ ४ ॥

तदा नौकातलच्छिद्रा-
दागच्छति जलेऽङ्गना. ।
विमला विह्वला भूत्वा
मिथो वचनमब्रुवन् ॥ ५ ॥

गर्जन्त्यभ्रगणा पतन्ति च शिला रुन्धन्ति धारा दिशो
वाताश्चैव तदुद्भवास्तत इत कर्षन्ति नौकामिमाः ।
भूत्वा रन्ध्रमिहापि हन्त तरणेरन्त प्रविष्टं पयः
कि कुर्म किमनाय्यमौ नृपसुत का वा भवेन्नो गतिः ॥६॥

प्रागेवेदमनर्थहेतुकमिति व्यक्तं मयोक्त स्त्रिय-
श्श्रोत्रे कि न्यपतत्तदीषदपि वस्सत्य बलीयान् विधि
बह्वीना स्थितिमेकतो मृगदृशामाहुर्युगान्ते बुधा
गर्वे चैवमभूदित. परमिय भानोस्सुता नो गति ॥ ७ ॥

एतन्महार्हगुणदूषणदोषतो वा

अस्माकमेव गृहनिर्गमलम्पतो वा
सम्भावित तदिदमस्य शम न विद्म ॥ ८ ॥

कृत्यं रहस्यमिह न प्रथित यदि स्या-
त्तद्दलमैरपि वियोजयितु न किं स्यात् ।
आनीत एष न विमृश्य वधूभिरत्र
हा नोऽद्य चञ्चलमवैर्यमुपैति चेत ॥ ९ ॥

इति चिन्ता समासाद्य
त्रातारमनवेक्ष्य च ।
कालिन्दीं प्रार्थयामासु-
रेव क्षेमाय तास्त्रिय ॥ १० ॥

कालिन्दि नेऽञ्जलिरयं रचितोऽङ्गनाभि-
स्सम्पूज्य पुष्पनिकरैर्बहुधातिभक्त्या ।
कामेन वामगतिना खलु वञ्चितास्स्म-
स्त्रायस्व नस्तव गृहाण विभूषणानि ॥ ११ ॥

अस्माभिरेकमिह चिन्तितमन्यदेव
देवेन किं किमिह निश्चितमस्ति वा न. ।
फाले यथैव लिखित विधिना तथास्तु

स्त्रीभि कृतं किमपि तत्प्रलयाय नूनं
आसीद्विनोद इह नोऽयमनर्थहेतु ।
बुद्ध्या हृतास्स्म कथनेन किमद्य देवि
त्रायस्व बालकमिमं स हि जीवितं न ॥ १३

एवं तां प्रार्थयन्तीस्ता
हर्यर्थे हरिणीदृश ।
दृष्ट्वा विधिमुखा देवा
एवमन्योन्यमब्रुवन् ॥ १४ ॥

अपारससारसमुद्रतश्श्रिता-
न्प्रतारयत्येष निमेषत प्रभुः ।
स्त्रियो नदीं तस्य कृतेऽल्पजीवनेऽ-
प्यहो मुहुस्ता प्रणमन्ति सादरम् ॥ १५ ॥

अथ तत्प्रार्थनाया च
व्यर्थायां व्रजयोषित ।
शौरेः पूर्वस्थिति स्मृत्वा
विलप्तुमुपचक्रमु ॥ १६ ॥

क्रीडन्तं पुरि शैशवेन तरुणीतुङ्गस्तने निर्मल-
क्रन्दन्त प्रतिगेहमन्ययुवतीस्सायन्दिव सद्धियम् ।

सुख्यन्त सुदतीजनैम्मह तरुच्छायासु धीरैर्नुत
म्बाल त ममनीनयन्निह सरिन्मध्य स्त्रियो हा कथम् ॥१७॥

दुर्बुद्ध्यैव हि सङ्गताऽयमतुलोऽनर्घोऽत्र नो योषिता-
मानीतोऽयमिहाप्सु किं युवतिभिस्तोयेऽतिभीरुर्हरि ।
कालिन्दीं महसा प्रतार्य निबिडे वर्षान्धकारेऽप्यमु
मीदन्त पृथुक पुनर्गमयितु मात्रन्तिक हा कथम् ॥ १८ ॥

अथैव विलपन्तीना-
न्तासामाभीरयोषिताम् ।
सुभीतवदिमा वाच-
म्प्रोवाच मधुसूदन ॥ १९ ॥

अह बदरनिमित्तं गृह्य (?) मुक्ताफलानि
प्रविशति मयि वीथीं नर्मगोष्ठ्या स्त्रियां व ।
पयसि मिहिरसूनो वञ्चितोऽहं विनीतो
हितमिति युवतीना विश्वसेत्को नु वाच ॥ २० ॥

वैद्यस्येव वचश्शौरे-
र्धैर्यकरमङ्गना ।
श्रुत्वा तत्सुभृश भीता
कान्तास्तदिदमब्रुवन् ॥ २१ ॥

स्थितमयि पुरि दारान् वञ्चयित्वात्र शौरि-
न्द्रुतमनुनयवाक्यैर्गानयन्नीभिरामि ।
इह मधु मधुकीटान् वञ्चयित्वा विसृष्ट
स्फुटमुरुतरुशाखाबद्धमानीय भूमौ ॥ २२ ॥

हा त्वन्निमित्तमयि नस्तनुपोषणं च
हा त्वत्कृते गुरुजनस्य विमाननं च ।
स्नानादिकर्मसु सदा स्मरणं च ते न
किन्न्वेनदर्थमहहा नृहरे सुजातम् ॥ २३ ॥

आतृप्ति नेऽङ्घ्रिकमलद्वयमेवनेच्छा
देहान् त्वदर्थमुपकल्पयितुं स्थितास्था ।
सौख्यं त्विति परमिति त्वयि नो दुराशा
किन्न्वेनदर्थमहहा नृहरे सुजातम् ॥ २४ ॥

नस्त्वा श्रुतिस्मृतिपुराणनुत प्रपत्ति-
स्त्वन्नाम तारकमिति त्वदुपासनं च ।
त्वद्दास्यकृत्यमहनं च कथंचिदेव
किन्न्वेतदर्थमहहा नृहरे सुजातम् ॥ २५ ॥

प्राग्जन्मकोटिषु भृतं सुमहत्तपश्च
प्राप्तं पुराजनुषि राघवतो वरश्च ।

एतन्निमित्तमयि किं त्वयि तद्दृय न
त्यक्तुं वय पयसि हा नृहर सुजातम ॥ २६ ॥

भृश विलपतीरिव-
माभीरयुवतीरसौ ।
समीक्ष्य जीवनापाय-
मिदमाह तथा हरि ॥ २७ ॥

कालो न शोचितुमयं भजताशु धैर्य-
ङ्कामस्य हन्तुरपि कर्मफल ह्यलङ्घ्यम ।
उन्मुच्य कञ्चुकचयान्द्रुतमेव नौका-
रन्ध्रे विनिक्षिपत साधु यथाम्बु नायात् ॥ २८ ॥

श्रुत्वा तदा यदुवरस्य वचोऽमृतानि
मत्वा हितानि सहसा व्रजसारसाक्ष्य ।
बद्ध्वाञ्चलानि सुदृढ नवकञ्चुकानि
मुक्त्वा मुखे निदधिरे विवरस्य तस्या ॥ २९ ॥

इति श्रीमत्कविवेङ्कटसूरिण कृतौ

## नौकाचरित्रे

तृतीयस्सर्ग ॥

---

## अथ श्रीमत्कविवेङ्कटसूरिणः कृतौ

## नौकाचरित्रे

चतुर्थस्सर्गः ॥



तद्गलचित्रितनवीनखलीनजात

क्षिप्तं मुखेऽतिविपुलस्य बिलस्य तस्य ।

नीतं बहिस्समपदि तुङ्गतरङ्गसङ्घै-

स्तास्तत्समीक्ष्य सहसैव तथैवमूचुः ॥ १ ॥

हा तानि कञ्चुकशतानि हृतानि नीरैः

वाताहतिं न सहते तनुता तनोर्नः ।

जानूपरि स्पृशति रन्ध्रसमुद्गताम्भः

का नो गतिर्वद हर पृथु ते यशस्स्यात् ॥ २ ॥

अस्मानुपायकथनेन वियोगभीरू-

स्त्रायस्व दर्शय बलं तव यत्पुरोक्तम् ।

संयोगतोऽजनि वधूभिरयं प्रयास-

स्साह्यं हरे तव कदापि न विस्मरेम ॥ ३ ॥

ङ्गे किमेतदसुहृज्जनदृष्टिदोषा-
ज्जन्मैव न किमथ वास्य कृते स्वदोषात् ।
त्रायसे श्रितनृपाल भयात्किमस्मा-
न्नायाति हा तव कृपा नृहरे किमर्थम् ॥ ४ ॥

ति तासां महाबाहु-
र्निशम्य परिदेवनम् ।
दमाह तदा शौरि
कटूषधसमं वच. ॥ ५ ॥

ायं भवत्यवसर परिदेवनस्य
साय भवेज्झटिति पश्यत कार्यशेषम् ।
वीयं नवांशुकचय सहसा विमुच्य
देयं मुखाय विवरस्य वधूभिरस्य ॥ ६ ॥

श्रुत्वा हरेरिदमधीरदृशोऽन्तरङ्गे
गत्वा नवं परिभव व्यथया ह्रिया च ।
भूत्वा परं विमनसस्त्वनितम्बिनीत्व-
मुक्त्वा धिगस्त्वित्ति पुनर्गिरमेवमूचु ॥ ७ ॥

कार्यं कथं तदिदमा किमुवाच शौरि-
रस्मास्तु मानधनता न हि किं स्त्रियश्चेत ।

हा किं रहस्यमिह जीवितमस्ति चेन्न
कान्ताः पुरे निजवन परिपालयाम. ॥ ८ ॥

हा कृष्ण किं वदसि वञ्चनया तत्राल
कस्याश्चिदप्यनघमापुरतो वदैवम् ।
माभूदिहापदि तदेतदसाधुमौर्ख्यं
गोप्या विमृश्य कुरुताश्चियमात्महत्या ॥ ९ ॥

हा कृष्ण शक्नुयुरिमा किमिहापि नग्नै-
स्स्थातु नवैरवयवैर्भुवि तद्यशो वा ।
हा हन्त मद्वचनमद्य निशम्य मुग्धा
मा प्रापयिष्यथ तट किमितो न जाने ॥ १० ॥

कि पाप्मना फलमिद नृहरे वधूना
कि नो ललाटलिपिरेवमिति स्थिता वा ।
वादाय कि प्रणय एष निसर्गतश्चे—
द्वामाः कदापि भुवि विश्वसितुं न योग्या ॥ ११ ॥

एवं निशम्य वचन
हरेरक्लिष्टकर्मण ।
चिन्तयामासुरबला
मिथ कर्तव्यता प्रति ॥ १२ ॥

समस्तजगदाधार-
स्सर्ववेदार्थनिश्चय ।
केन वा त्रायते देवः
पथा सर्वं समीक्ष्यताम् ॥ १३ ॥

निश्चित्य सत्यमिति तस्य वचस्स्त्रियस्ता
कृष्णस्य तत्र शनकैस्स्वदुकूलजातम् ।
उन्मुच्य सत्रपमधो विवरान्तरेऽस्मि-
न्निक्षिप्य तस्थुरथ तत्सरिदाजहार ॥ १४ ॥

श्येयुरित्यथ भृशं प्रतिपद्य लज्जा
सङ्कुच्य गात्रमखिलं विनताननाब्जा ।
आच्छादनाय कुचयोः करयोर्युगं स्वं
नाभूदिति स्वहृदि दैवमदूषयत्ता ॥ १५ ॥

सा गलद्वसनशैवलबन्धखिद्य-
द्वक्षोजकुड्मलतनूलतिकाननाब्जैः ।
कासरोऽम्बुभरितं स्फुटमन्तिकस्थ-
तत्कृष्णजीवनदतां प्रकटीचकार ॥ १६ ॥

वीतेषु तेषु वसनेषु विवर्धितेषु

निक्षिप्य वक्षसि हरिं प्रममोक्ष्य तस्य
रूपं सगद्गदमिद पुनरब्रुवस्ताः ॥ १८ ॥

एवं ललाटलिखितं यदि नो विधात्रा
तस्यान्यथात्व न भवेदिति ते वचोभि ।
नश्नास्स काममिदमेव हरेऽवशिष्ट
हा कष्टमशुकचय क्व न दृश्यते हि ॥ १८ ।

एव विलप्य करुण हृदि पूर्वपुण्यान्
मत्वाथ नश्वरमितीदृशसर्वमाग्यम् ।
सत्कृष्णपादसरसोरुहमाप्तुकामा
वामा अपि स्फुटतर मिथ एवमूचु. ॥ १९ ॥

पश्यामो न कमप्युपायमिह यस्मातु स्त्रियो नो भवे-
दाकण्ठ समभूज्जल न सहते भारन्त्विती नौर्ध्रुवम् ।
नामैवास्य हरेरजन्यवदत ध्यायन्त्य एवासकृ-
द्भक्त्या तच्चरणौ स हि श्रितविभुर्दद्यात्सुखं नो हरि· ॥२

नीत कञ्चुकमशुक च विगतो मान क्व नो जीवितं
नौका मज्जति मज्जतीह हरिरप्यद्याम्बु संवर्धितम् ।
भो ब्रह्मेश मुकुन्द माधव हरे नस्सद्गतिं प्रापये-
त्याक्रोशद्रवल्लवीकलकलैर्हर्षस्ततासमृगि ॥ २१ ॥

सर्वाधारस्सकलगुणधिर्निर्गुणो निर्विकार-
स्सर्वात्मासौ सकलविभवोऽप्यादिमध्यान्तशून्यः।
साक्षीरूपस्सकलनिगमोत्तमको मोहनाङ्ग-
स्साक्षादासीत्तमथ महिला प्रार्थयामासुरेवम् ॥ २२ ॥

इदं सर्वं सत्यं न भवति जगद्भोगविषयः
पदं ते दिव्यं न प्रदिश परम श्रीश नृहरे।
यदेतद्ब्रह्मेन्द्रप्रमुखविबुधैस्सेवितमल
शुकव्यासाक्रूरप्रभृतिविनुतं वेदविदितम् ॥ २३ ॥

आकर्ण्य नीरजदृशां भृशमर्थनां ता-
मालोक्य तादृगदशामतिदुस्सहां च।
क्रव्यादनीरदमरुत्कृतदीनरक्ष
कृष्णस्तदा हितमिदं कृपया चचक्षे ॥ २४ ॥

मामेव चेतसि निधाय पिधाय नेत्रे
पाणिद्वयेन सहसैव निरुद्धबाष्पाः।
भक्त्या क्षणं भजत चेद्भवदिष्टदैवं
दद्यात्सुखं युवतयः कुरुतैवमाशु ॥ २५ ॥

वैद्यस्येव गदार्दिता धनवतो निस्स्वा यथा सेवका-
गर्भिण्यश्च यथा प्रसूतिसमये स्वे सूतिकायास्तथा।

भत्तया तत्र वचो निशम्य नृहरेगच्छाद्य हस्तैस्त्रिय-
स्स्वान्यक्षोणि भजन्त्य एव हृदि त प्रापुस्स्थिति पौर्विका।

न ध्वान्तं न हि गर्जितं न च मरुद्वर्ष न चाम्भोधरा
नौकाया न हि कुत्रचिल्लवजल नालोकि रन्ध्र क वा ।
दृष्टा सापि निजस्थले तरलतामुत्सृज्य तत्र स्त्रिय-
श्चेलान्यन्तिक एव कन्चुकयुतान्यालोक्य हर्ष गताः ॥

स्वक्षिभ्रु सितमञ्जु खेलदलक फालस्फुरच्चित्रक
चञ्चत्कुण्डलरत्नदीधितिलसद्गण्डस्थलीशोभितम् ।
दृष्ट्वा मन्मथमन्मथस्य नृहरेरास्य तदिन्दूज्ज्वलं
मुग्धास्तत्र पुरानुभूतमसुख विस्मृत्य हृष्टा जगु ॥ २८

दृष्ट्वा त निजरूपनिर्जितमनोजन्मानमब्जाननं
मानार्थं मृदुभाषिण मुरहर स्निग्धावलोक हरिम ।
क्रीडन्तं सतत निकुञ्जसदने हृत्कञ्जमध्ये सता
त्रातार वरकुञ्जरस्य नितरामालिङ्गय हृष्टास्स्त्रिय ॥ २९

गन्धान् हिमोदकलितान् घनसारमिश्रान्
भूवल्लभाय ददुरम्बुजचारुनेत्र्य ।
कस्तूरिकातिलकमप्यलिकेऽस्य चक्रु-
श्शीतांशुवंशतिलकस्य तदा तरुण्य. ॥ ३० ॥

दिव्यैस्सुवर्णवसनैर्मणिभूषणैश्च
पुष्पादिभिर्मदनसुन्दरजयस्ता ।
सर्वं निवेद्य निजभोगसुखं तवेति
नीराजनं च निगमावसथस्य चक्रुः ॥ ३१ ॥

तस्योपदां समुपकल्प्य तदा तरुण्य-
स्तारुण्यमेव तरुणस्य मुदा स्वकीयम् ।
चक्रुः प्रणाममपि मानस एव मुग्धा
भक्त्यान्विता मुरहरस्य सहस्रकृत्वः ॥ ३२ ॥

एवं हरिं हरिणलोलविलोचनास्ता-
स्सम्पूज्य तत्र सुभृशं विविधोपचारैः ।
आनन्दमापुरतुलं हृदि योगभाज-
स्तद्दर्शनाद्भगवतोऽनुभवन्ति यं वै ॥ ३३ ॥

ताराणामिव चन्द्रमा दिविषदां मध्ये यथैषा विभु—
र्मुक्तानामिव पद्मरागतरलो यद्वद्वशानां द्विपः ।
शौरिस्तद्वदभात्तदा मृगदृशां मध्ये सुरः प्रेक्ष्य तं
सम्पूज्यापि सुमैस्ततो निरगमस्तद्वीक्ष्य हृष्टास्त्रियः ॥ ३४ ॥

ततोऽवरुह्य तरणेस्तरुणीगणास्ते

सानन्दमध्वनि निजोत्सवसम्भ्रमेण
सार्थीकृतेन्द्रमुखवर्त्यनिमेषभावा ॥ ३५ ॥

गन्धेन मूर्छति दिशो दश दिव्यधूपे
पुष्पाणि वर्षति नभस्स्थितदेवसङ्घे ।
कान्त्या प्रसर्पति दिश करदीपिकौघे
गच्छन् परा पथि मुद स वधूजनोऽगात् ॥ ३६ ॥

दृप्यन्नवांशुकचयैर्वरकञ्चुकैश्च
पादाङ्गुलीक्वणिततन्नवभूषणैश्च ।
हस्ताङ्गुलिस्फुरितरत्नमयोर्मिकाभि-
र्गच्छन् परां पथि मुद स वधूजनोऽगात् ॥ ३७ ॥

गण्डस्थलीस्फुरितकर्णविभूषणैश्च
वक्षस्स्थलीचलितभासुरतारहारैः ।
हस्ताङ्घ्रिनिक्वणितकङ्कणनूपुराद्यै
र्गच्छन् परा पथि मुद स वधूजनोऽगात् ॥ ३८ ॥

गायन् हरिं दिवि किरन् पटवासपांसून्
प्रोक्षन्मिथस्स्तनतटीषु हिमोदबिन्दून् ।
विष्वग्दिशो धवलयन् सितचन्द्रिकाभि-
र्गच्छन् परां पथि मुद स वधूजनोऽगात् ॥ ३९ ॥

सवीजयन् करचलव्यजनानिलैस्स्वै-
रालिङ्गयन् मुहुरुरोजयुगैर्भुजैश्च ।
नत्रोद्वहन् सरसमच्युतमक्षियुग्मे
गच्छन् परा पथि मुद स वधूजनोऽगात् ॥ ४० ॥

धम्मिल्लविच्छुरितदिव्यसुमोदिताभि-
रुत्कीर्यमाणपटवाससमेधिताभि ।
स्वैर घमघमदनर्धसुवासनाभि-
र्गच्छन् परा पथि मुद स वधूजनोऽगात् ॥ ४१ ॥

एव व्रजन् व्रजवधूनिवहस्तदानीं
हर्षेण त सह नयन् मधुकैटभारिम् ।
मध्येपुर कमपि नैजविहारगेह
प्रापय्य तत्र तदिद शुभमाचचक्षे ॥ ४२ ॥

मङ्गल महानुभाव देवदेव मङ्गल
मङ्गल श्रितास्मदार्तिभञ्जनाज मङ्गलम् ।
परात्परेन्दिरासहाय मङ्गल
मङ्गल मुकुन्द कृष्ण न मनास्तु मङ्गलम् ॥ ४३ ॥

ू : ॥

एतद्वे सूरिणा विरचितं पापौघविध्वंसनं
पुण्यं पुण्य ां हितं सुमहितं नौकाचरित्रं हरेः ।
नित्यं यश यात् पठेच्च स भवेद्भक्तया व बलात्
तेनैवाशु सुयोजितोऽत्र परतश्श्रेयोऽमृताभ्यां सुधीः ॥ ४४

इति श्रीमत्कविवे सूरिणः कृतौ

## नौकाचरित्रे

र्थस्सर्गः ॥

॥ समाप्तश्चायं ग्रन्थः ॥

*Copies can be had of —*
**The Saurashtra Sabha,**
*Madura*
&
**The Indian Music Publishing House,**
*4, Bunder Street, Mad*

NAUKA CHARITRAM